"रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः ।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ॥
तेऽत्यर्थं दुष्टमुष्णञ्च गाढ़विट्कप्रपीड़िताः ।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ॥
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः ।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ॥
विट् श्यावं कठिनं रूक्षमधोवायुर्न वर्त्तते ।
तनु चारुणवर्णञ्च फेनिलञ्चासृगर्शसां ॥
कट्यूरुगुदशूलञ्च दौर्ब्बल्यं यदि चाधिकं ।
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणं ॥
शिथिलं श्वेतपीतञ्च विट् स्निग्धं गुरु शीतलं ।
यद्यर्शसां घनञ्चासृक् तन्तुमत् पाण्डु पिच्छिलं ॥
गुदं सपिच्छं स्तिमितं गुरु स्निग्धञ्च कारणं ।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः" ॥

गदे कीला अर्शांसि । पित्ताकृतिसमन्विताः पित्तार्शोलक्षणयुक्ताः । आकारेण च वटप्ररोहादिसदृशाः । दुःखै रोगैः । त्वक्पारुष्याम्बुशीतप्रार्थनादिभिः । कलुषेन्द्रियः व्याकुलसर्वेन्द्रियः ॥ ० ॥ रक्तजस्यापि वातोल्वणस्य लक्षणमाह ॥ तत्र रक्तार्शसि । अनुबन्धः उल्वणत्वं । रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यं । पित्तोल्वणस्य तु लक्षणं ।

"रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः"। इत्यादिनैवोक्तं । रक्तपित्तयोः समानलिङ्गत्वात् ॥ *॥ कफोल्वणस्य लक्षणमाह । सपिच्छं पिच्छिलार्द्रं । स्तिमितमार्द्रचर्म्मावगुण्ठितमिव ॥*॥ अथ श्लेष्मार्शोलक्षणमाह ।

"श्लेष्मोल्वणा महामूला घना मन्दरुजः सिताः ।
उत्पन्नोपचिताः स्निग्धाः स्तब्धवृत्तगुरुस्थिराः ॥
पिच्छिलास्तिमिताः श्लक्ष्णाः कण्ड्वाढ्याः स्पर्शनप्रियाः
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः ॥
वङ्क्षणानाहिनः पायुवस्तिनाभिविकर्षिणः ।
सकासश्वासहृल्लासप्रसेकारुचिपीनसाः ॥
मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः ।
क्लैब्याग्निमार्द्दवच्छर्द्दिरामप्रायविकारदाः ॥
वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः ।
न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः" ॥

उत्पन्नाः उन्नताः । उपचिताः स्थूलाः । स्निग्धाः सस्नेहाः । स्थिरा निश्चलाः । पिच्छिलाः कफारब्धत्वात् । स्तिमिताः आर्द्रवस्त्रगुण्ठिता इव । श्लक्ष्णा मणिवन्मसृणाः । करीरो वंशाङ्कुरः । पनसास्थिगोस्तनाः तदाकृतयः । वङ्क्षणानाहिनः वङ्क्षणयोरानाहकारिणः । पाय्वादिष्वाकर्षणवत् पीड़ाकारिणः । कृच्छ्रं मूत्रकृच्छ्रं । शिरोजाड्यं शिरसो भाराक्रान्तत्वमिव । क्लैब्यं स्त्रीष्वनिच्छा । अत्र छर्द्दिशब्दः सान्त आर्षत्वात् । आमप्रायविकारदाः आमबहुला व्याधयोऽतीसारग्रहण्यादयः तान् ददाति ॥ ० ॥ अथ द्वन्द्वजार्शोलक्षणमाह ।

"हेतुलक्षणसंसर्गाद्विद्यात् द्वन्द्वोल्वणानि च" ॥*॥

अथ त्रिदोषार्शसः सहजार्शसश्च लक्षणमाह ।

"सर्व्वैः सर्व्वात्मकान्याहुर्लक्षणैः सहजानि च"। सर्व्वैर्लक्षणैर्वातपित्तश्लेष्मार्शोलक्षणैः प्रागुक्तैः । सर्व्वात्मकानि सान्निपातिकान्यर्शांस्याहुः । तथा तरेव लक्षणैः सहजानि चार्शांस्याहुः ॥ * ॥ तन्त्रान्तरे सहजार्शोलक्षणं पृथगाह ।

"अर्शांसि सहजातानि दारुणानि भवन्ति हि ।
दुर्द्दर्शनानि पाण्डूनि परुषाण्यरुणानि च ॥
अन्तर्म्मुखानि तैरार्त्तः क्षीणः क्षीणस्वरो भवेत् ।
क्षीणानलः क्षीणरेताः शिरासन्ततविग्रहः ॥
अल्पप्रजः क्रोधशीलः सन्ततान्त्रस्वनान्वितः ।
शिरोहृत्कर्णनासासु रोगी ष्ठीवप्रसेकवान्" ॥ *॥

अथ सुखसाध्यार्शोलक्षणमाह ।

"वाह्यायान्तु वलौ जातान्येकदोषोल्वणानि च ।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च" ॥

वाह्यायां वलौ संवरण्यां । न चिरोत्पतितानि अनतिक्रान्तसंवत्सराणि । एतानि लक्षणानि मिलितानि सुखसाध्यत्वबोधकानि ॥ * ॥ अथ कष्टसाध्यार्शोलक्षणमाह ।

"द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च ।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च" ॥

द्वितीयायां वलौ विसर्जन्यां । परिसंवत्सराणि परिगतः सवत्सरो येषां तानि । अतिक्रान्तसंवत्सराणि इति यावत् । एतानि प्रत्येकं कष्टसाध्यलक्षणानि ॥ * ॥ अथासाध्यार्शोलक्षणमाह ।

"सहजानि त्रिदोषाणि यानि चाभ्यन्तरां वलिं ।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्द्दिशेत्" ॥

अभ्यन्तरां वलिं प्रवाहिणीं । एतान्यपि प्रत्येकमसाध्यलक्षणानि ।

"शेषत्वादायुषस्तानि चतुष्पादसमन्वये ।
याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा" ॥

यद्यायुषः शेषो वर्त्तते चिकित्सायाश्चत्वारः पादास्ते यथा । वद्यवचनकारी धनवानुदारो जितेन्द्रियो रोगी । १ । शास्त्रे कर्म्मणि च कुशलो वैद्यः । २ । अनलस आप्तः प्रियः परिचारकः । ३ । नवं रसवीर्य्यादियुक्तमौषधं । ४ । एषां समन्वये संयोगे सति दीप्तकायाग्नेः पुरुषस्य । तानि अर्शांसि । याप्यन्ते चिकित्सया । अतोऽन्यथा प्रत्याख्येयानि न चिकित्स्यानीत्यर्थः ॥ * ॥ अथार्शोऽरिष्टमाह ।

"हस्ते पादे मुखे नाभ्यां गुदे वृषणयोस्तथा ।
शोथो हृत्पार्श्वशूलञ्च यस्यासाध्योऽर्शसो हि सः ॥

असाध्यः सन्निहितमरणो बोद्धव्यः । अर्शसः अर्शोरोगयुक्तः । एतन्मिलितमरिष्टलक्षणं ।

"हृत्पार्श्वशूलं संमोहच्छर्द्दिरङ्गस्य रुग्ज्वरः ।
तृष्णा गुदास्यपाकश्च निहन्युर्गुदजातुरं ॥

गुदस्य यदास्यमोष्ठदेशस्तस्य पाकः । हृत्पार्श्वशूलादिसमस्तं व्यस्तं चारिष्टलक्षणं ॥

"तृष्णारोचकशूलार्त्तमतिप्रस्रुतशोणितं ।
शोथातिसारसंयुक्तमर्शांसि क्षपयन्ति हि" ॥*॥

अथ मेढ्रादिजार्शोलक्षणमाह ।

"मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि च ।
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च" ॥

यथास्वं यथात्मीयलक्षणं । न चात्रोक्तनिदानपूर्व्वरूपसंप्राप्तिलक्षणयुक्तं । तत्र तत्रार्शःपदं तु मांसाङ्कुरसाम्यात् । गण्डूपदः किञ्चुलकः ॥ * ॥ अत्र मांसाङ्कुरसाम्यादत्राधिकारे चर्म्मकीलस्य संप्राप्तिपूर्व्वकं लक्षणमाह ।

"व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो वहिः ।
कीलोपमं स्थिरखरश्चर्मकीलन्तु तद्विदुः" ॥

चर्म्मा इति लोके । खरं कर्कशं ॥ * ॥ तस्यैव वातादिभेदेन लक्षणमाह ।

"वातेन तोदपारुष्यं पित्तादसितरक्तता ।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता" ॥

सवर्णता शरीरसमानवर्णता ॥ * ॥ अथ सामान्यतः अर्शसश्चिकित्सा ।

"यद्वायोरानुलोम्याय यदग्निबलवृद्धये ।
अन्नपानौषधं सर्वं तत्सेव्यं नित्यमर्शसैः" ॥

अर्शसैः अर्शोरोगयुक्तैः ।

"शालियष्टिकगोधूमयवान्नानि घृतैः सह ।
अजाक्षीरेण वा निम्बपटोलानां रसेन वा ॥
कन्दैर्व्वार्त्ताकुमूलोत्थै रसैर्मांसरसेन वा ।
जीवन्त्युपोदिकाशाकैस्तण्डुलीयकदात्तकैः" ॥१॥

कन्दोऽत्र सूरणः । अत्र मूलं मूलकं ।

"अन्यैश्च सृष्टविण्मूत्रमरुद्भिर्वह्निदीपनैः ।
अर्शांसि भिन्नवर्चांसि हन्याद्वातातिसारवत् ॥
सतक्रं लवणं दद्याद्वातवर्चोऽनुलोमनं ।
न प्ररोहन्ति गदजाः पुनस्तक्रसमाहताः ॥
तक्राभ्यासोऽर्शसैः कार्य्यो बलवर्णाग्निवृद्धये ।
स्रोतःसु तक्रशुद्धेषु सम्यक् चलति यद्रसः ॥
तेन पुष्टिस्तथा तुष्टिर्बलं वर्णश्च जायते ।
वातश्लेष्मविकाराणां शतञ्च विनिवर्त्तयेत् ॥
मृल्लिप्तं शौरणं कन्दं पक्त्वाग्नौ पुटपाकवत् ।
अद्यात् सतैललवणं दुर्नामविनिवृत्तये ॥ २ ॥
चिरिविल्वाग्निसिन्धूत्थनागरेन्द्रयवारलून् ।
तक्रेण पिबतोऽर्शांसि निपतन्त्यसृजा सह" ॥

चिरिविल्वः करञ्जः तस्य फलस्यात्र मज्जा ग्राह्या । अरलुः श्योनकः । करञ्जादिचूर्णं ॥ ३ ॥

"लेपं रजनिचूर्णेन सुधादुग्धयुतेन च ।
अर्शोरोगनिवृत्त्यर्थं कारयेत्तच्चिकित्सकः ॥ ४ ॥
पिप्पलीसैन्धवं कुष्ठं शिरीषस्य फलं तथा ।
स्नुग्दुग्धमर्कदुग्धं वा लेपोऽयं गुदजान् हरेत् ॥५॥
हरिद्राजालिनीचूर्णं कटुतैलसमन्वितं ।
एष लेपो वरः प्रोक्तो ह्यर्शसामन्तकारकः" ॥

जालिनी कटुतुरइ इति लोके ॥ ६ ॥

"असितानां तिलानान्तु पलं शीतजलेन तु ।
खादतोऽर्शांसि शाम्यन्ति दृढ़ा दन्ता भवन्ति हि ॥७॥
शस्त्रैर्व्वाथ जलौकोभिः प्रोच्छूनकठिनार्शसः ।
शोणितं सञ्चितं दृष्ट्वा हरेत् प्राज्ञः पुनः पुनः ॥ ८ ॥
कासीसं सैन्धवं कृष्णा शुण्ठी कुष्ठञ्च लाङ्गली ।
शिलाभिदश्वमारश्च दन्तीजन्तुघ्नचित्रकं ॥
तालकं कुनटी स्वर्णक्षीरी चैतैः पचेद्भिषक् ।
तैलं स्नुह्यर्कपयसा गवां मूत्रे चतुर्गुणे ॥
एतदभ्यङ्गतोऽर्शांसि क्षारेणेव पतन्ति हि ।
क्षारकर्म्मकरं ह्येतन्न च संदूषयेद्वलिं" ॥

कासीसं कौसीस इति लोके । लाङ्गली करहारी